

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## तृतीयकाण्डे तृतीयः प्रश्नः

### वैकृतविधीनामभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अग्ने तेजस्विन् तेजस्वी त्वन्देवेषु भूयास्तेजस्वन्तम्मामायुष्मन्तँव्वर्चस्वन्तम्मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माऽहन्तेजो हासिषम्मा मान्तेजो हासीदिन्द्रौजस्विन्नोजस्वी त्वन्देवेषु भूया ओजस्वन्तम्मामायुष्मन्तँव्वर्चस्वन्तम्मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ ॥ [१] ॥ जसे जुहोम्योजोविदस्योजो मा मा हासीन् माऽहमोजो हासिषम्मा मामोजो हासीथ् सूर्य भ्राजस्विन् भ्राजस्वी त्वन्देवेषु भूया भ्राजस्वन्तम्मामायुष्मन्तँव्वर्चस्वन्तम्मनुष्येषु कुरु वायोश्च त्वाऽपाञ्च भ्राजसे जुहोमि सुवर्विदसि सुवर्मा मा हासीन्माऽहꣳ सुवर्हासिषम्मा माꣳ सुवर्हासीन् मयि मेधाम्मयि प्रजाम्मय्यग्निस्तेजो दधातु मयि मेधाम्मयि प्रजाम्मयीन्द्र इन्द्रियन्दधातु मयि मेधाम्मयि प्रजाम्मयि सूर्यो भ्राजो दधातु ॥ [२] ॥

(क्षत्रस्य च मयि त्रयोविꣳशतिश्च) ॥ १ ॥

वायुर्हिङ्कर्ताऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनन्ते देवाः प्राणभृतः प्राणम्मयि दधत्वेतद्वै सर्वमद्ध्वर्युरुपाकुर् वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणम्मयि दधत्वित्याहैतदेव सर्वमात्मन् धत्त इडा देवहूर् मनुर्

यज्ञनीर् बृहस्पतिरुक्थामदानि शꣳसिषद् विश्वे देवाः ॥ [३] ॥ सूक्तवाचः पृथिवि मातर् मा मा हिꣳसीर् मधु मनिष्ये मधु जनिष्ये मधुवक्ष्यामि मधुवदिष्यामि मधुमतीन्देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यांम्मनुष्येभ्यस्तम्मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु ॥ [४] ॥

(शꣳसिषद् विश्वे देवा अष्टाविꣳशतिश्च) ॥ २ ॥

---

वसवस्त्वा प्र वृहन्तु गायत्रेण छन्दसाऽग्नेः प्रियम्पाथ उपेहि रुद्रास्त्वा प्र वृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियम्पाथ उपेह्यादित्यास्त्वा प्र वृहन्तु जागतेन छन्दसा विश्वेषान्देवानाम्प्रियम्पाथ उपेहि मान्दासु ते शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु वाशीषु विश्वभृथ्सु माद्ध्वीषु ककुहासु शक्करीषु ॥ [५] ॥ शुक्रासु ते शुक्र शुक्रमा धूनोमि शुक्रन्ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः॥ आऽस्मिन्नुग्रा अचुच्यवुर् दिवो धारा असश्चत॥ ककुहꣳ रूपव्वृँषभस्य रोचते बृहथ् सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः॥ यत् ते सोमाऽदाभ्यन्नाम जागृवि तस्मै ते सोम सोमाय स्वाहोशिक् त्वन्देव सोम गायत्रेण छन्दसाऽग्नेः ॥ [६] ॥ प्रियम्पाथो अपीहि वशी त्वन्देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियम्पाथो अपीह्यस्मथ्सखा त्वन्देव सोम जागतेन छन्दसा विश्वेषान्देवानाम्प्रियम्पाथो अपीह्या नः प्राण एतु परावत आऽन्तरिक्षाद् दिवस्परि। आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा॥ इन्द्राग्नी मे वर्चः कृणुताव्वँर्चः सोमो बृहस्पतिः। वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना॥ दधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत्। परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ [७] ॥

(शक्करीष्व ग्नेर् बृहस्पतिः पञ्चविꣳशतिश्च) ॥ ३ ॥

---

एतद्वा अपान्नामधेयङ्गुह्यय्यँदाधावा मान्दासु ते शुक्र शुक्रमा धूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुन्धे शुक्रन्ते शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपय्यँद् रात्रिः सूर्यस्य रश्मयो वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर् दिवो वृष्टिं च्यावयत्याऽस्मिन्नुग्रा ॥ [८] ॥ अचुच्यवुरित्याह यथायजुरेवैतत् ककुहꣳ रूपव्वृँषभस्य रोचते बृहदित्याहैतद्वा अस्य ककुहꣳ रूपय्यँद्वृष्टी रूपेणैव वृष्टिमव रुन्धे यत्ते सोमाऽदाभ्यन्नाम जागृवीत्याहैष ह वै हविषा हविर् यजति

योऽदाभ्यङ्गृहीत्वा सोमाय जुहोति परा वा एतस्याऽऽयुः प्राण एति ॥ [९] ॥ योꣳऽशुङ्गृ-
ह्णात्या नः प्राण एतु परावत इत्याहाऽऽयुरेव प्राणमात्मन् धत्तेऽमृतमसि प्राणाय त्वेति हिरण्य-
मभि व्यनित्यमृतवै हिरण्यमायुः प्राणोऽमृतेनैवाऽऽ*युरात्मन् धत्ते शतमानम्भवति शतायुः
पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजवा आपो भेषजमेव कुरुते
॥ [१०] ॥

(उग्रा एत्या प स्त्रीणि च) ॥ ४ ॥

वायुरसि प्राणो नाम सवितुराधिपत्येऽपानम्मे दाश्चक्षुरसि श्रोत्रन्नाम धातुराधिपत्य आयुर्
मे दा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजाम्मे दा ऋतमसि सत्यन्नामेन्द्रस्याऽऽ*धिपत्ये
क्षत्रम्मे दा भूतमसि भव्यन्नाम पितृणामाधिपत्येऽपामोषधीनाङ्गर्भन्धा ऋतस्य त्वा व्योमन
ऋतस्य ॥ [११] ॥ त्वा विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे
प्रजापतिर् विराजमपश्यत् तया भूतञ्च भव्यञ्चाऽसृजत तामृषिभ्यस्तिरोऽदधात् ताञ्जमदग्निस्त-
पसा ऽपश्यत् तया वै स पृश्नीन् कामानसृजत तत् पृश्नीनाम्पृश्नित्वय्यत् पृश्नयो गृह्यन्ते
पृश्नीनेव तैः कामान्यजमानोऽव रुन्धे वायुरसि प्राणो ॥ [१२] ॥ नामेत्याह प्राणापानावे-
वाव रुन्धे चक्षुरसि श्रोत्रन्नामेत्याहाऽऽयुरेवाव रुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवाव रुन्ध
ऋतमसि सत्यन्नामेत्याह क्षत्रमेवाव रुन्धे भूतमसि भव्यन्नामेत्याह पशवो वा अपामोषधीना-
ङ्गर्भः पशूनेवा ॥ [१३] ॥ व रुन्ध एतावद्वै पुरुषम्परितस्तदेवाव रुन्ध ऋतस्य त्वा व्योमन
इत्याहेयवा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन इत्याहाऽन्तरिक्षवा ऋतस्य
विभूमान्तरिक्षमेवाभि जयत्यृतस्य त्वा विधर्मण इत्याह द्यौर् वा ऋतस्य विधर्म दिवमेवाभि
जयत्यृतस्य ॥ [१४] ॥ त्वा सत्यायेत्याह दिशो वा ऋतस्य सत्यन्दिश एवाभि जयत्यृतस्य
त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव लोकमभि जयत्येतावन्तो वै
देवलोकास्तानेवाभि जयति दश सम्पद्यन्ते दशाक्षरा विराडन्नव्विराड् विराज्येवान्नाद्ये प्रति
तिष्ठति ॥ [१५] ॥

(दिवमेवाभि जयत्यृतस्य षट्चत्वारिꣳशच्च) ॥ ५ ॥

देवा वै यद्यज्ञेन नावारुन्धत तत् परैरवारुन्धत तत् पराणाम्परत्वय्ँयत् परे गृह्यन्ते यदेव यज्ञेननावरुन्धे तस्यावरुद्ध्यै यम्प्रथमङ्गृह्णातीममेव तेन लोकमभि जयति यन्द्वितीयमन्तरिक्षन्तेन यन्तृतीयममुमेव तेन लोकमभि जयति यदेते गृह्यन्त एषाँल्लोकानामभिजित्या ॥ [१६] ॥ उत्तरेष्वहस्समुतोऽर्वाञ्चो गृह्यन्तेऽभिजित्यैवेमाँल्लोकान् पुनरिमँल्लोकं प्रत्यवरोहन्ति यत् पूर्वेष्वहस्स्वितः पराञ्चो गृह्यन्ते तस्मादितः पराञ्च इमे लोका यदुत्तरेष्वहस्समुतोऽर्वाञ्चो गृह्यन्ते तस्मादमुतोर्ऽवाञ्च इमे लोकास्तस्मादयातयाम्नो लोकान् मनुष्या उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्मात्‌ सत्याद्‌द्ध्य ओषधयः सम्भवन्त्योषधयो ॥ [१७] ॥ मनुष्याणामन्नम्प्रजापतिम्प्रजा अनु प्र जायन्त इति परानन्विति ब्रूयाद्यद्गृह्णात्यद्‌भ्य स्त्वौषधीभ्यो गृह्णामीति तस्माद्‌द्ध्य ओषधयः सम्भवन्ति यद्गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति तस्मादोषधयो मनुष्याणामन्नय्ँयद्गृह्णाति प्रजाभ्यस्त्वा प्रजापतये गृह्णामीति तस्मात्‌ प्रजापतिम्प्रजा अनु प्र जायन्ते ॥ [१८] ॥

(अभिजित्यैभवन्त्योषधयोऽष्टाचत्वारिꣳशच्च) ॥ ६ ॥

प्रजापतिर् देवासुरानसृजत तदनु यज्ञोऽसृज्यत यज्ञञ्छन्दाꣳसि ते विष्वञ्चो व्यक्रामन्थ् सोऽसुराननु यज्ञोऽपाक्रामद्यज्ञञ्छन्दाꣳसि ते देवा अमन्यन्ताऽमी वा इदमभूवन्यद्वयꣳ स्म इति ते प्रजापतिमुपाऽधावन्थ् सोऽब्रवीत् प्रजापतिश्छन्दसाँव्वीर्यमादाय तद् वः प्र दास्यामीति स छन्दसाँव्वीर्य ॥ [१९] ॥ मादाय तदेभ्यः प्रायच्छत् तदनु छन्दाꣳस्यपाऽक्रामन् छन्दाꣳसि यज्ञस्ततो देवा अभवन् पराऽसुरा य एवञ्छन्दसाँव्वीर्यव्वेदाऽऽश्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै कमद्ध्वर्युरा श्रावयतीति छन्दसाँव्वीर्यायेति ब्रूयादेतद् वै ॥ [२०] ॥ छन्दसाँव्वीर्यमा श्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो य एवव्वेद सवीर्यैरेव छन्दोभिरर्चति यत् किञ्चार्चति यदिन्द्रो वृत्रमहन्नमेद्ध्यन्तद्यद्यतीनपावपदमेद्ध्यन्तदथ कस्मादिन्द्रो यज्ञ आ सꣳस्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर् यद्यज्ञस्तामेव तद् यजन्ति य एवव्वेदोपैनय्ँयज्ञो नमति ॥ [२१] ॥

(छन्दसाँव्वीर्यं वा एव त दृष्टौ च) ॥ ७ ॥

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतम्पीत्वा मधु चारु गव्यम्पितेव पुत्रमभि रक्षतादिमम्॥ आ वृश्च्यते वा एतद्यजमानोऽग्निभ्याँय्यदेनयोः शृतंकृत्याथाऽन्यत्रावभृथ मवैत्यायुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यन् जुहुयादाहुत्यैवैनौ शमयति नाऽऽर्तिमार्च्छति यजमानो यत् कुसीद ॥ [२२] ॥ मप्रतीत्तम्मयि येन यमस्य बलिना चरामि। इहैव सन् निरवदये तदेतत् तदग्ने अनृणो भवामि। विश्वलोप विश्वदावस्य त्वाऽऽसञ्जुहोम्यग्धादेकोऽहुतादेकः समसनादेकः। तेनः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यम्॥ अयन्नो नभसा पुरः सꣳस्फानो अभि रक्षतु। गृहाणामसमत्यै बहवो नो गृहा असन्न्॥ स त्वन्नो ॥ [२३] ॥ नभसस्पत ऊर्जन्नो धेहि भद्रया। पुनर् नो नष्टमा कृधि पुनर् नो रयिमा कृधि॥ देव सꣳस्फान सहस्रपोषस्येशिषे स नो रास्वाऽज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ सँव्वथ्सरीणाꣳ स्वस्तिम्॥ अग्निर् वाव यम इयँय्यमी कुसीदँव्वा एतद्यमस्य यजमान आ दत्ते यदोषधीभिर् वेदिꣳ स्तृणाति यदनुपौष्य प्रयायाद् ग्रीवबद्धमेन ॥ [२४] ॥ ममुष्मिँल्लोके नेनीयेरन्यत् कुसीदमप्रतीत्तम्मयीत्युपौषतीहैव सन् यमङ्कुसीदं निरवदायानृणः सुवर्गँल्लोकमेति यदि मिश्रमिव चरेदञ्जलिना सक्तून् प्रदाव्ये जुहुयादेष वा अग्निर् वैश्वानरो यत् प्रदाव्यः स एवैनꣳ स्वदयत्यह्नाँव्विधान्यामेकाष्टकायामपूपं चतुश्शरावम्पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि ॥ [२५] ॥ दहति पुण्यसमम्भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुप यन्ति यो वा उपद्रष्टारमुपश्रोतारमनुख्यातारँव्विद्वान्यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽग्निर् वा उपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता तान्य एवँव्विद्वान्यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽयन्नो नभसा पुर ॥ [२६] ॥ इत्याहाग्निर् वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वन्नो नभसस्पत इत्याह वायुर् वै नभसस्पतिर् वायुमेव तदाहैतन्मे गोपायेति देव सꣳस्फानेत्याहाऽसौ वा आदित्यो देवः सꣳस्फान आदित्यमेव तदाहैतन्मे गोपायेति ॥ [२७] ॥

(कुसीदं त्वन्न एन मोषेद्यदि पुर आदित्यमेव तदाहैतन्मे गोपायेति) ॥ ८ ॥

ए॒तय्ँयु॒वा॑न॒म्परि॑ वो ददामि॒ तेन॒ क्रीड॑न्तीश्चरत प्रि॒येण॑। मा नः॑ शाप्त ज॒नुषा॑ सुभागा रा॒य-
स्पोषे॑ण स॒मि॒षा म॑देम॥ नमो॑ महि॒म्न उ॒त चक्षु॑षे ते॒ मरु॑ताम्पितस्त॒दह॑ङ्गृणामि। अनु॑ मन्यस्व
सु॒यजा॑ यजाम॒ जुष्ट॑न्दे॒वाना॑मि॒दम॑स्तु ह॒व्यम्॥ दे॒वाना॑मे॒ष उ॑पना॒ह आ॑सी॒दपाङ्गर्भ॑ ओष॑धीषु
न्य॑क्तः। सोम॑स्य द्र॒प्सम॑वृणीत पू॒षा ॥ [२८] ॥ बृ॒हन्न॒द्रिर॑भव॒त् तदे॑षाम्॥ पि॒ता व॒त्साना॒-
म्पति॑रघ्नि॒याना॒मथो॑ पि॒ता म॑ह॒ताङ्गर्ग॑राणाम्। व॒त्सो ज॒रायु॑ प्रति॒धुक् पी॒यूष॑ आ॒मिक्षा॒ मस्तु॑
घृ॒तम॑स्य रेतः॑॥ त्वाङ्गावो॑ऽवृणत रा॒ज्याय॒ त्वाꣳ ह॑वन्त म॒रुतः॑ स्व॒र्काः। वर्ष्म॑न् क्ष॒त्रस्य॑ क॒कुभि॑
शिश्रिया॒णस्ततो॑ न उ॒ग्रो वि भ॑जा॒ वसू॑नि॥ व्यृ॑द्धेन॒ वा ए॒ष प॒शुना॑ यजते॒ यस्यै॒तानि॒ न क्रि॒यन्त॑
ए॒ष ह॒ त्वै समृ॑द्धेन यजते॒ यस्यै॒तानि॑ क्रि॒यन्ते॑ ॥ [२९] ॥

(पू॒षा क्रि॒यन्ते॑ ए॒षो॑ऽष्टौ च॑) ॥ ९ ॥

सूर्यो॑ दे॒वो दि॑वि॒षद्भ्यो॑ धा॒ता क्ष॒त्राय॑ वा॒युः प्र॒जाभ्यः॑। बृह॒स्पति॑स्त्वा प्र॒जाप॑तये॒ ज्योति॑-
ष्मतीञ्जुहोतु॥ यस्या॑स्ते॒ हरि॑तो॒ गर्भोऽथो॒ योनि॑र्हिर॒ण्ययी॑। अङ्गा॒न्यह्रु॑ता॒ यस्यै॒ तान्दे॒वैः सम॑-
जीगमम्॥ आ व॑र्तन वर्तय॒ नि निव॑र्तन व॒र्तयेन्द्र॑ नर्दबुद। भूम्या॒श्चत॑स्रः प्र॒दिश॒स्ताभि॒रा व॑र्तया॒
पुनः॑॥ वि ते॑ भिनद्मि तक॒रीव्वि॒ योनि॒व्वि ग॑वी॒न्यौ॑। वि ॥ [३०] ॥ मा॒तर॑ञ्च पु॒त्रञ्च॒ वि गर्भ॑ञ्च
ज॒रायु॑ च॥ ब॒हिस्ते॑ अस्तु बा॒लिति॑॥ उ॒रु॒द्र॒प्सो वि॒श्वरू॑प॒ इन्दुः॒ पव॑मानो॒ धीर॑ आनञ्ज॒ गर्भ॑म्॥
एक॑पदी द्वि॒पदी॑ त्रि॒पदी॒ चतु॑ष्पदी॒ पञ्च॑पदी॒ षट्प॑दी स॒प्तप॑द्य॒ष्टाप॑दी॒ भुव॒नाऽनु॑ प्रथता॒ꣳ स्वाहा॑॥ म॒ही
द्यौः पृ॑थि॒वी च॑ न इ॒मय्ँय॒ज्ञम्मि॑मिक्षताम्। पि॒पृ॒तान्नो॒ भरी॑मभिः ॥ [३१] ॥

(ग॒वी॒न्यौ॑ वि च॒तुश्च॑त्वारिꣳशच्च) ॥ १० ॥

इ॒दव्ँवा॑मा॒स्ये॑ ह॒विः प्रि॒यमि॑न्द्राबृहस्पती। उ॒क्थम्मद॑श्च शस्यते॥ अ॒यव्ँवा॒म्परि॑ षिच्यते॒ सोम॑
इन्द्राबृहस्पती। चारु॑र्म॒दाय॑ पी॒तये॑॥ अ॒स्मे इ॑न्द्राबृहस्पती र॒यिन्ध॑त्तꣳ शत॒ग्विन॑म्। अश्वा॑-
वन्तꣳ सह॒स्रिण॑म्॥ बृह॒स्पति॑र् नः॒ परि॑पातु प॒श्चादु॒तोत्त॑रस्मा॒दध॑रादघा॒योः। इन्द्रः॑ पु॒रस्ता॑-
दु॒त म॑ध्य॒तो नः॒ सखा॒ सखि॑भ्यो॒ वरि॑वः कृणोतु॥ वि ते॒ विष्व॒ग् वात॑जूतासो अग्ने॒ भाम॑सः

॥ [३२] ॥ शुचे॒ शुच॑यश्चरन्ति। तु॒वि॒म्र॒क्षासो॑ दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृष॒ता रु॒जन्त॑ः॥
त्वाम॑ग्ने॒ मानु॑षीरीडते॒ विशो॑ होत्रा॒वि॒दँ्विवि॑चिꣳ रत्न॒धात॑मम्। गुहा॒ सन्त॑ꣳ सुभग वि॒श्वद॑-
र्॒शतन्तुविष्म॒णस॑ꣳ सु॒यज॑ङ्घृ॒तश्रिय᳚म्॥ धा॒ता द॑दातु नो र॒यिमीशा॑नो॒ जग॑त॒स्पति॑ः। स न॑ः
पू॒र्णेन॑ वावनत्॥ धा॒ता प्र॒जाया॑ उ॒त रा॒य ई॑शे धा॒तेदँ॒विश्व॒म्भुव॑नञ्जजान। धा॒ता पु॒त्रँय्यज॑माना॒य
दाता॒ ॥ [३३] ॥ तस्मा॑ उ ह॒व्यङ्घृ॒तव॑द्विधेम॥ धा॒ता द॑दातु नो र॒यिम्प्राची᳚ञ्जी॒वातु॒मक्षि॑ताम्।
व॒यन्दे॒वस्य॑ धीमहि सु॒मति॑ꣳ स॒त्यरा॑धसः॥ धा॒ता द॑दातु दा॒शुषे॒ वसू॑नि प्र॒जाका॑माय मी॒ढुषे॑
दु॒रो॒णे। तस्मै॑ दे॒वा अ॒मृता॒ः सँव्य्य॑यन्ता॒विश्वे॑ दे॒वासो॒ अदि॑तिः स॒जोषा᳚ः॥ अनु॑ नो॒ऽद्याऽनु॑मतिर्
य॒ज्ञन्दे॒वेषु॑ मन्यताम्। अ॒ग्निश्च॑ हव्य॒वाह॑नो॒ भव॑तान्दा॒शुषे॒ मय॑ः॥ अन्विद॑नुमते॒ त्वं ॥ [३४] ॥
मन्या॑सै॒ शञ्च॑नः कृधि। क्रत्वे॒ दक्षा॑य नो हिनु॒ प्र ण॒ आयू॑ꣳषि तारिषः॥ अनु॑ मन्यतामनु॒म-
न्य॑माना प्र॒जाव॑न्तꣳ र॒यिमक्षी॑यमाणम्। तस्यै॑ व॒यꣳ हेड॑सि॒ माऽपि॑ भूम॒ सा नो॑ दे॒वी सु॒हवा॒
शर्म॑ यच्छतु॥ यस्या॑मि॒दम्प्र॒दिशि॒ यद्वि॒रोच॒तेऽनु॑मति॒म्प्रति॑ भूषन्त्या॒यव॑ः। यस्या॑ उ॒पस्थ॑ उ॒र्व॑-
न्तरि॑क्ष॒ꣳ॒ सा नो॑ दे॒वी सु॒हवा॒ शर्म॑ यच्छतु ॥ [३५] ॥ रा॒काम॒हꣳ सु॒हवा॑ꣳ सुष्टु॒ती हु॑वे शृ॒णोतु॑
नः सु॒भगा॒ बोध॑तु॒ त्मना᳚। सीव्य॒त्वप॑ः सू॒च्याऽच्छि॑द्यमानया॒ ददा॑तु वी॒रꣳ श॒तदा॑यमु॒क्थ्य᳚म्॥
यास्ते॑ राके सु॒मत॑यः सु॒पेश॑सो॒ याभि॒र् ददा॑सि दा॒शुषे॒ वसू॑नि। ताभि॑र् नो अ॒द्य सु॒मना॑ उ॒पाग॑हि
सहस्रपो॒षꣳ सु॑भगे॒ ररा॑णा॥ सिनी॑वालि॒ >१, या सु॑पा॒णिः >२॥ कु॒हूम॒हꣳ सु॒भगा᳚ँवि॒द्मनाप॑-
सम॒स्मिन्य॒ज्ञे सु॒हवा᳚ञ्जोहवीमि। सा नो᳚ ददातु॒ श्रव॑णम्पितृ॒णान्तस्या᳚स्ते देवि ह॒विषा॑ विधेम॥
कु॒हूर् दे॒वाना॑म॒मृत॑स्य॒ पत्नी॒ हव्या॑ नो अ॒स्य ह॒विष॑श्चिकेतु। सन्दा॒शुषे॑ कि॒रतु॒ भूरि॑ वा॒मꣳ रा॒य-
स्पोष॑ञ्चिकि॒तुषे॑ दधातु ॥ [३६] ॥

(भामा॑सो॒ दाता॒ त्व म॒न्तरि॑क्ष॒ꣳ॒ सा नो॑ दे॒वी सु॒हवा॒ शर्म॑ यच्छतु॒ श्रव॑णं॒ चतु॑र्विꣳशतिश्च) ॥ ११ ॥

## समाप्ति कोर्वैः

(अग्ने॑ तेजस्विन् वा॒युर् वस॑वस्त्वै॒तद्वा अ॒पां वा॒युर॑सि प्रा॒णो नाम॑ दे॒वा वै य॒द्य॒ज्ञेन॒ न प्र॒जाप॑तिर् देवासु॒रा ना॑यु॒र्दा ए॒तँय्युवा॑न॒ꣳ॒ सूर्यो॑ दे॒व इ॒दँव्वा॒ मेका॑दश)
(अग्ने॑ तेजस्विन् वा॒युर॑सि॒ छन्द॑साँव्वी॒र्यं॑ मा॒तर॑ञ्च॒ षड्वि॑ꣳशत्)

(अग्ने॑ तेजस्विङ्॒ श्चिकि॒तुषे॑ दधातु)

॥ हरिः ॐ ॥

## तृतीयकाण्डे तृतीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ३६ |

ॐ